IV 7.—SKM केशट ; SM, SP अद्भुतपुण्य.
V 7.—Sbhv. मुक्तापीड ; SKM धर्मपाल.
VI 1.—Sbhv. रतिसेन ; SP भर्तृहरि.
XII 1.—AV मालवरुद्र ; SKM हरि ; SM जलमानुषीरुद्र.
XII 5.—SKM विद्यापति ; SM वररुचि ; SP मालवरुद्र.
XII 8.—AV भट्टेन्दु ; SM रीसुक ; SP श्रीशुक.
XIII 6.—Sbhv. जयादित्य ; SKM धर्मकीर्ति.
XIV 8.—Sbhv. हस्तिपक ; SKM भर्तृमेण्ठ.
XV 5.—SKM कविराज ; SM, SP भोजदेव.

पुरातन महाकवि सन्दृब्ध

अन्योक्त्यष्टक संग्रह

१. हंसाष्टकम् ।

यः संतापं[1] गाङ्गं[2] सन्त्यन्यत्रापि[3] तट[4] गतं[5] स्सरसि[6] ।
अपसरणमथ[7] स्थित्वा[8] गदितं हंसाष्टकं नाम† ॥ १ ॥

यः[1] संतापमपाकरोति जगतां यश्चोपकारक्षमः
सर्वेषाममृतात्मकेन वपुषा प्रीणाति नेत्राणि यः ।
तस्याप्युन्नतिमम्बुदस्य सहसे यन्न त्वमेतावता
वर्णेनैव परं मराल ! धवलः कृष्णश्चरित्रैरसि ॥ १

गाङ्गमङ्ग सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
चीयते न च न चापचीयते राजहंस ! तव शुद्धपक्षता ॥ २

सन्त्यन्यत्रापि वीचीचयचकितचलत्क्रौञ्चचञ्चुप्रभिन्न-
प्रोन्निद्राम्भोजरेणुप्रकरविरचनाहारिवारिप्रवाहाः ।
किन्तु स्वच्छाशयत्वं जगति [2]न सुलभं तेन गत्वापि दूरं
बद्धोत्कण्ठानुरागादनुसरति सरो मानसं राजहंसः ॥ ३

तटमनुतटं पद्मे पद्मे निवेशितमानसं
प्रतिकमलिनीपत्रच्छायं क्षणं क्षणमासितम् ।
नयनसलिलैरुष्णैः कोष्णाः कृता जलवीचयो
जलदमलिनां हंसेनाशां विलोक्य गमिष्यता ॥ ४

गतं तद्गाम्भीर्यं तटमुपचितं जालकशतैः
सखे हंसोत्तिष्ठ त्वरितममुतो याम सरसः ।
न यावत् पङ्काम्भःकलुषिततनुर्भूरिविलसद्
बकोटो[3] वाचाटश्चरणयुगलं मूर्ध्नि कुरुते ॥ ५

---

† Marginal gloss = प्रथमश्लोके द्वाराणि सर्वत्र. १ सर्वत्रान्योक्तिरलङ्कारः । २ दुर्लभम्. ३ टिट्टिभः.

स्मरसि[४] सरसि वीचीमम्बुदोलायितानां
तदनु बिलसताग्रं त्वन्मुखाद् यन्मयाऽऽप्तम् ।
इति मनसि निविष्टामालपन्नेव हंसीं
त्यजति विरहखेदाज्जीवितं राजहंसः ॥ ६

अपसरणमेव युक्तं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचाटष्टिट्टिभो यत्र ॥ ७

स्थित्वा[५] चिरं नभसि निश्चलतारकेण[६]
मातङ्गसङ्गकलुषां नलिनीं विलोक्य ।
उत्पन्नमन्युपरिघर्घरनिःस्वनेन
हंसेन साश्रु [७]परिहृत्य गतं नलीनम् ॥ ८

॥ इति हंसाष्टकम् ॥

---

२. चक्राष्टकम् ।

अस्तं[(१)] मित्रे[(२)] वापी[(३)] कवलित-[(४)]शतगुण-[(५)]दिनान्त[(६)]मेकेन[(७)] ।
उत्कूजति[(८)] कथय[(९)] तथा वदन्ति चक्राष्टकं नाम ॥

अस्तं गतोऽयमरविन्दवनैकबन्धु-
र्भास्वान्न लङ्घयति कोऽपि विधेः प्रणीतम् ।
चक्राङ्ग धैर्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं न हि दीनचित्ताः ॥ १

मित्रे क्वापि गते सरोरुहवने बद्धानने क्लाम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयिताऽऽश्लिष्टं पुरः सारसम् ।
चक्राङ्गेन वियोगिना बिसलता नास्वादिता नोज्झिता
वक्त्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥ २

वापीतोयं तटतरुवनं पद्मिनी पत्रशय्या
चन्द्रालोको[८] विकचकुमुदामोदहृद्यः[९] समीरः ।
यत्रैतेऽपि प्रियविरहिणो दाहिनश्चक्रनाम्न-
स्तत्रोपायः क इह भवतु प्राणसंधारणाय ॥ ३

कवलितमिह नालं कन्दलं चेह दष्टं
इह हि कुमुदकोशे पीतमम्भः सुशीतम् ।

---

४ हे सहचरि. ५ स्थितम्. ६ कनीनिकेन. ७ सरः. ८ चन्द्रा(द्र)ज्योत्स्ना. ९ तज्जन्यः.

इति विरटति रात्रौ पर्यटन्ती तटान्ते
सहचरपरिमुक्ता चक्रवाकी वराकी ॥ ४

[10]शतगुणपरिपाट्या पर्यटन्नन्तराले[11]
कुमुदकुवलयानामर्धरात्रेऽप्यखिन्नः ।
उपनदि दयितायाः क्वापि शब्दं निशम्य
भ्रमति पुलिनपृष्ठे चक्रवच्चक्रवाकः ॥ ५

दिनान्ते चक्रवाकेन प्रियाविरहभीरुणा ।
तथा निःश्वसितं तेन यथा नोच्छ्वसितं पुनः ॥ ६

एकेनार्कं प्रकटितरुषापाटलेनास्तसंस्थं[12]
पश्यत्यक्ष्णा[13]ऽश्रुजललुलितेनापरेण स्वकान्तम् ।
अह्नच्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ संकीर्णौ रचयति रसौ[14] नर्तकीव प्रगल्भा ॥ ७

उत्कूजति* श्वसति मुह्यति याति तीरं
तीरान्तरं तरुतलात् पुनरेति वापीम् ।
वाप्यां न तिष्ठति न चात्ति मृणालखण्डं
चक्रः क्षपासु† विरहे खलु चक्रवाक्याः ॥ ८

कथय किमपि दृष्टं स्थानमस्ति श्रुतं वा
व्रजति दिनकरोऽयं यत्र नास्तं कदाचित् ।
‡[इति विहगसमूहान्नित्यमेवास्ति पृच्छन्
रजनिविरहभीतश्चक्रवाको वराकः ॥] ९

॥ इति चक्राष्टकम् ॥



१० शतवार. ११ मध्ये. १२ अस्ताचलगतम्. १३ अन्येन. १४ करुणारौद्रौ.

* The Ms. reads उत्कूजित.

† The Ms. reads क्षिपासु.

‡ The portion in square brackets is supplied from A. M. (p. 70, V. 145) as it was found missing in the Ms.

३. भ्रमराष्टकम्।

[‖येनामोदिनि[१] कृत्वा[२] मातङ्गेना[३]न्यासु[४]निरा[५] दूरात्[६]]।
प्रतिवेशि[७] निरानन्दो[८] भ्रमराष्टकमेतदाख्यानम्[१५] ॥

येनामोदिनि केसरस्य मुकुले पीतं मधु स्वेच्छया
नीता येन निशा शशाङ्कधवला पद्मोदरे शारदी¶।
भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोऽयं भृङ्गयुवा करीरविटपे बध्नाति तुष्टिं कुतः॥ १

कृत्वापि कोशपानं भ्रमरयुवा पुरत एव कमलिन्याः।
अभिलषति बकुलकलिकां मधुलिहि[१६] मलिने कुतः सत्यम्॥ २

मातङ्गेन मदावलिप्तमतिना यत्कर्णतालानिलै-
र्दानार्थं समुपागता मधुलिहो दूरं समुत्सारिताः।
तस्यैवाननमण्डनक्षतिरसौ भृङ्गाः पुनः सर्वतो
जीविष्यन्ति वनान्तरेषु विलसत्पुष्पासवैः शीधुभिः॥ ३

अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः[१७]सुमनोलतासु।
मुग्धामिमामसरसां कलिकामकाल-
बालां कदर्थयसि किं नवमालिकायाः[१८]॥ ४

निराचष्टे[१९] यष्टिं कुरुबकतरोरब्ज [सरसा-
म] सद्भावं[२०] ब्रूते वदति बकुलानामकुशलम्।
वनान्ते [२१]चूतानाम [भवन] मिहाख्याति वसता
मसौ झिण्टीझाटे[२२] झटिति घटमानो[२३] मधुकरः॥ ५

दूरादुज्झति चम्पकं* न च भजत्यम्भोजराजीरजो
नो जिघ्रत्यपि पाटलापरिमलं धत्ते न चूते रतिम्।
मन्दारे यदनादरी विचकिलोपान्ते† च संतप्यते
तन्मन्ये क्वचिदङ्ग भृङ्गतरुणेनास्वादिता मालती॥ ६

[२४]प्रतिवेशी हंसजनः क्रीडाभवनानि पुण्डरीकाणि।
हृद्यं मधुजलममलं मधुकर तत्रैव यदि सरसि॥ ७

‖ The first half of the प्रतीक stanza is missing in the Ms. so I have reconstructed it.

१५ द्वाराणि. १६ यथा अन्येऽपि. १७ पुष्पस्य. १८ अन्योक्तिरलङ्कारः. १९ निराकरोति. २० अरुचिः. २१ आम्राणाम्. २२ सेवंतीवृक्षे. २३ दृश्यते. २४ प्रातिवेश्मिकः.

¶ The Ms. reads शादरी.

* The Ms. reads पंचकम्.

† The Ms. reads विचकलोपान्ते.

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले [सालम्बो] लवमपि लवङ्गे न रमति ।
प्रियङ्गे नो सङ्गं रचयति न चूतेऽभिरमते
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥ ८

॥ इति भ्रमराष्टकम् ॥

४. करभाष्टकम् ।

सरलित[१] न भवति[२] चिन्तां[३] रूक्षं[४] दुःप्राप[५] वक्र[६]मायाते[७] ।
चर करभ[८] सहितमस्यां कथितं करभाष्टकं नाम ॥

सरलितगलनालीं कन्धरां धत्स्व धैर्यात्
करभ लघुशमीनां ग्रासमेकं गृहाण ।
सरसमधुरपत्रास्ताः कुतः पीलुजात्यो
हरिततरकरीरे रे मरौ ये प्ररूढाः[२५] ॥ १

न भवति मिथुनानां प्रेम लावण्ययोगा-
ज्जनयति सुखमन्तः कस्यचित्कोऽपि दृष्टः ।
पतति झटिति दृष्टिर्दग्धदासेरकाणां
जरठझुरुटवल्लीपिंजरासु स्थलीषु ॥ २

चिन्तां मुञ्च गृहाण पल्लवमिदं प्लक्षस्य सालस्य वा
गाङ्गस्यास्य जलस्य चन्द्रवपुषो[२६] गण्डूषमेकं[२७] पिब ।
जीवन् द्रक्ष्यसि ताः पुनः करभ हे दासेरकीया भुवो
रम्या पीलुशमीकरीरबदरीकूजत्कपोताकुलाः ॥ ३

रूक्षं वपुर्न च विलोचनहारि रूपं
न श्रोत्रयोः सुखद[मारटि]तं कदाचित् ।
इत्थं न साधु तव किंचिदिदं तु साधु
तुल्ये रतिः करभ कण्टकिनि द्रुमे यत् ॥ ४

दुःप्रापमम्बु पवनः परुषोऽतितापी
छायाभृतो न तरवः फलभारनम्राः ।
इत्थं[२८] सखे करभ चेन्न भवांस्तदुच्चैः
का स्याद् गतिः खलु मरौ रमणीयतायाः[२९] ॥ ५

२५ प्रवृद्धाः. २६ चन्द्रवदुज्ज्वलम्. २७ चलुक(कं). २८ मरोः रमणीयत्वं त्वमेव.
२९ रमणीयताया गतिस्त्वमेव.

वक्रग्रीवमुदीक्षसे किमपरं बाष्पाम्बुपूर्णेक्षणः
क: खेदः करभाधुना तृणलवैः संतर्पयैतद्वपुः ।
कान्तान्तःस्फुरदोष्ठसंपुटभुवो ये लीलया[न्]दोलिताः
मुक्तास्ते नवनीलकन्दल[दल]श्यामाः शमीपल्लवाः ॥ ६
आयाते दयिते मरुस्थलभुवां संचिन्त्य दुर्लक्ष्यतां
गेहिन्या परितोषबाष्पतरलामासज्य दृष्टिं मुखे ।
दत्त्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादरा-
दुन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥ ७
चर करभ यथेच्छं सन्ति शष्पाण्यरण्ये*
बहुकुसुमसमृद्धाः पीलवश्च स्थलीषु ।
यदि गणयसि वाक्यं बन्धुवर्गस्य दूरात्
परिहर करवीरं मृत्युरेवैष सद्यः ॥ ८

॥ इति करभाष्टकम् ॥

५. हरिणाष्टकम् ।

रज्वा(१) स्थलीनाम(२)सकृत्(३) प्रियायां(४) छित्त्वा(५) द्रुत(६)त्यक्त(७) समेतमन्याः(८) ।
आद्यं पदं दर्शितमष्टभेदं पूर्वप्रसिद्धं हरिणाष्टकस्य ॥

रज्वा दिशः प्रविततः सलिलं विषेण
[३०]पाशैर्मुहुर्हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतचापाः
कं देशमाश्रयतु यूथपतिर्मृगाणाम् ॥ १
स्थलीनां दग्धानामुपरि मृगतृष्णामनुसरँ-
स्तृषार्तः सारङ्गो विरमति न खिन्नेऽपि मनसि ।
अजानानस्तत्त्वं न च [३१]मृगयतेऽन्यत्र सरसी-
मभूमौ प्रत्याशा न च फलति विघ्नं च कुरुते ॥ २
असकृदसकृन्नष्टाङ्गोऽयं मृगो मृगतृष्णिकां
श्रमपरिगतोऽप्युत्पक्ष्माक्षः परैति पुनः पुनः ।
गणयति न तन्मायातोयं हृतः सलिलाशया
भवति हि मतिस्तृष्णान्धानां विवेकपराङ्मुखी ॥ ३

---

* The Ms. reads शिष्पाण्य°

३० रज्वा. ३१ याचयते.

प्रियायां[३२] स्वैरायामतिकठिनगर्भालसतया
किराते चाकर्णीकृतधनुषि धावत्यनुपदम् ।
प्रियाप्रेमप्राणप्रतिभयवशात् पश्यति दिशौ
मृगः पश्चादालोकयति च मुहुर्याति च मुहुः ॥ ४

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद् वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धावन् मृगः
कूपान्तःपतितः करोतु विमुखे किं वा विधौ पौरुषम् ॥ ५

द्रुततरमितो गच्छ प्राणैः कुरङ्ग वियुज्यसे[३३]
किमिति वलितग्रीवं स्थित्वा मुहुर्मुहुरीक्षसे ।
विदधति हतव्याधा नैते मनागपि[३४] सार्द्रतां[३५]
कठिनमनसामेषामेते विलोकनविभ्रमाः[३६] ॥ ६

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव[३७] मुक्तास्थली
विश्रामस्थितिहेतवो विगणिता बन्धूपमाः पादपाः ।
बालापत्यवियोगदुःखविधुरा मुक्तार्धमार्गे मृगी
मार्गान्तःपदवीं तथाप्यकरुणा [३८]व्याधा न मुञ्चन्ति माम् ॥ ७

अन्यास्ता मलयाद्रिकाननभुवः स्वच्छस्रवन्निर्झरा-
स्तृष्णा यासु निवर्तते तनुभृतामालोकमात्रादपि ।
[३९]रुक्षध्वांक्षपरिग्रहो मरुरयं स्फारीभवद्भ्रान्तय-
स्ता एता मृगतृष्णिका हरिण हे नेदं पयो गम्यताम् ॥ ८

॥ इति हरिणाष्टकम् ॥

---

६. सिंहाष्टकम् ।

क्षुत्क्षाम(१) मत्तेभ(२) मृगै(३)र्मृगारि(४)रद्यापि(५) निद्रा(६)प्रकृति(७)र्यथेष्टम्(८) ।
विस्रं वपुः(९) सामयुतं(१०) च लोके सिंहाष्टकं कस्य मदे न पुंसः ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविशालकुम्भदलनव्यायामबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १

---

३२ स्वेच्छाचारिण्याम्. ३३ विमुक्तो भविष्यति. ३४ ईषत्. ३५ त्वाम्. ३६ कथं कर्तव्याः. ३७ मातासमा. ३८ मया एतानि मुञ्चितानि तथापि ३९ काकावृयः.

मृगैर्नष्टं शशैर्लीनं वराहैर्वलितं रुषा।
हयानां हेषितं श्रुत्वा सिंहैः पूर्ववदासितम्॥ २
मत्तेभकुम्भनिर्भेदकठोरनखराशनिः।
मृगारिरिति नाम्नैव लघुतामेति केसरी॥ ३
मृगारिं वा मृगेन्द्रं वा सिंहं व्याहरतां जनः।
तस्य द्वयमपि व्रीडा क्रीडादलितदन्तिनः॥ ४
अद्यापि न स्फुरति केसरभारलक्ष्मी-
न प्रेङ्खति[40] ध्वनितमद्रिगुहान्तरेषु।
मत्तास्तथापि करिणो हरिणाधिपस्य
पश्यन्ति भीतमनसः पदवीं वनेषु॥ ५
निद्राघूर्णितलोचनो मृगपतिर्यावद् गुहां सेवते
तावत् स्वैरममी चरन्तु हरिणाः स्वच्छन्दसंचारिणः।
उन्निद्रस्य विधूतकेसरसटाभारस्य निर्गच्छतो
नादे श्रोत्रपथं गते हतधियां सन्त्येव दीर्घा दिशः॥ ६
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः।
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु॥ ७
यथेष्टं चेष्टध्वं मदमलिनगण्डाः करटिनः*
तटान्यद्रेर्मन्दं विकषत विषाणैश्च महिषाः।
सरागं सारङ्गाः सह सहचरीभिर्विचलत†
प्रचारः सिंहानामिह हि विधिना हन्त विहतः॥ ८
विस्रं वपुः परवधप्रवणं च कर्म
तिर्यक्तयैव कथितः सदसद्विवेकः।
इत्थं न किंचिदपि साधु मृगाधिपस्य
तेजस्विता स्फुरति यस्य जवाद् वराके॥ ९
सामोपायनयप्रपञ्चपटवः प्रायेण ये भीरवः
शूराणां व्यवसाय एव हि परं संसिद्धये कारणम्।
[41]विस्फूर्जद्विकटाटवीगजघटाकुम्भैकसंचूर्णना-
व्यापारैकरसस्य सन्ति विजये सिंहस्य के मंत्रिणः॥ १०

॥ इति सिंहाष्टकम्॥

४० श्रूयते. ४१ दृष्टान्तमाह.

* The Ms. reads करिटिनः।

† The Ms. reads विलचत।

७. धवलाष्टकम् ।

मार्गे(१) न खनति(२) चानसि(३) न ध्वानं(४) गुरु(५)र्य(य?)*था(६) वयस्यादौ(७) ।
†ऊढा येन(८) सुधवलैर्गदितं धवलाष्टकं शृणुत ॥

मार्गे कर्दमदुस्तरे जलभृते गर्ताशतैराकुले
　खिन्ने शाकटिके [४२]भरेऽतिविषमे दूरं गते रोधसि ।
शब्देनैतदहं ब्रवीमि महतां कृत्वोच्छ्रितां तर्जनी-
　मीदृक्षे विषमे विहाय धवलं वोढुं भरं कः क्षमः ॥ १

न खनति खुरैः क्षोणीपृष्ठं न नर्दति[४३] सादरं
　प्रकृतिपुरुषं प्रेक्ष्यासन्नं न कुप्यति गोतरम् ।
वहति च धुरं धुर्यो धैर्यादनुद्धरकन्धरो[४४]
　जगति गुणिनः कार्यौदार्याः परानतिशेरते ॥ २

अनसि सीदति सैकतवर्त्मनि प्रचुरभारभरक्षपितोक्षणि ।
गुरुभरोद्धरणोद्धुरकन्धरं[४५] स्मरति सारथिरन्यधुरन्धरम् ॥ ३

न ध्वानं कुरुषे न यासि विकृतिं नोच्चैर्वहस्याननं
　दर्पान्नोल्लिखसि क्षितिं खुरपटैर्नावज्ञया[४६] वीक्षसे[४७] ।
किन्तु त्वं वसुधातलैकधवलः स्कन्धाधिरूढे भरे
　तीव्राण्युच्चतटी[४८]विटङ्कविषमाण्युल्लङ्घयन् लक्ष्यसे ॥ ४

गुरुर्नायं भारः क्वचिदपि न पन्थाः स्थपुटितो[४९]
　न ते कुण्ठा ‡शक्तिर्वहनमपि नाङ्गेन विकलम् ।
इह द्रङ्गे नान्यस्तव गुणसमानस्तदधुना
　धुनानेन स्कन्धं धवल ! किमु मुक्तः[५०] पथि भरः ॥ ५

यथा भग्नः पन्था परुषविषमग्रावगहने
　गलीनां नाङ्गानि स्पृशति च यथा ‖सारथिरयम् ।

---

४२ गरिभारे भरे सति. ४३ शब्दयति. ४४ अनम्रकन्धरः. ४५ नम्रकन्धरम्. ४६ अगणनया. ४७ अन्यत्र. ४८ उच्चावच. ४९ उच्चावचेन. ५० त्वया भारो वाह्यः न तु मोच्यः.

* This latter half contains one mora too many. The discrepancy lies after गुरु, because there is a fusion of the fifth and the sixth चतुर्मात्र. If we read यथा for र्यथा, the structure of the latter half becomes quite regular.

† The Ms. reads ऊद्धा.

‡ The Ms. reads वक्ति.

‖ The Ms. reads सारथिरथम्. A. M. also reads the same The carrection is based on S. M. 25,5.

यथा चैते दृप्ताः स्खवलितभुवो यान्ति वृषभा-
स्तथा दूरीभूतः स खलु धवलो नूनमधुना ॥ ६
यस्यादौ व्रजमण्डनस्य[५१] बहुभिर्व्यूढा न गुर्वी धुरा
धौरेयैः प्रगुणीकृतो न युगपत् स्कन्धः समस्तैरपि ।
तस्यैव श्लथकम्बलस्य धवलस्योत्थापने* साम्प्रतं
द्रङ्गेऽत्रैव जरावसादिततनोर्गोपुण्यमुद्घुष्यते ॥ ७
ऊढा येन महाधुरा सुविषमे मार्गे सदैकाकिना
सोढो येन कदाचिदेव न निजे गोष्ठेऽन्यसण्डध्वनि ।
आसीद् यश्च गवां गणैकतिलकस्तस्यैव संप्रत्यहो
धिक्कष्टं धवलस्य जातजरसो गोपुण्यमुद्घुष्यते ॥ ८

॥ इति धवलाष्टकम् ॥

---

८. वानरवृत्ताष्टकम् ।

दक्षो(१) दानं(२) स्तब्धो(३) दुर्मन्त्री(४) शुष्कमिन्धनं(५) त्यजति(६) ।
अर्थः(७) क्रतौ(८) च लोके वानरवृत्ताष्टकं नाम ॥

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्योगी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥ १
दानं दरिद्रस्य विभोः प्रशान्तिर्यूनां तपो† ज्ञानवतां च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां दया च भूतेषु दिवं[५२] नयन्ति ॥ २
स्तब्धस्य नश्यति यशो विषमस्य[५३] मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ ३
दुर्मन्त्रिणं[५४] कमुपयान्ति न नीतिदोषाः
सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्वीकृता न विषयाः परितापयन्ति ॥ ४
शुष्केन्धने वह्निरुपैति वृद्धिं मूर्खेषु कोपश्चपलेषु शोकः ।
कान्तासु कामो निपुणेषु वित्तं धर्मो दयावत्सु महत्सु धैर्यम् ॥ ५

---

५१ धवलस्य. ५२ स्वर्गम्. ५३ जनस्य. ५४ राजानम्.

* The Ms. reads उत्थपने.

† The Ms. reads तापो.

त्यजति भयं [५५]कृतपापं मित्राणि [५६]शठं प्रमादिनं विद्या ।
ह्रीः कामिनमलसं श्रीः स्त्री क्रूरं [५७]दुर्जनं लोकः ॥ ६
अर्थस्य मूलं [५८]निकृतिः क्षमा च [५९]कामस्य वित्तं च [६०]वपुर्वयश्च ।
धर्मस्य दानं च दया दमश्च मोक्षस्य [६१]सर्वार्थनिवृत्तिरेव[६२] ॥ ७

[॥ इति वानरवृत्ताष्टकम् ॥]

९. वानर्यष्टकम् ।

माधुर्यमु(१)त्साह(२) सुजीर्ण(३)रूपं(४) श्रुतेन(५) शाठ्येन(६) जवो हि(७) वैद्यम्(८) ।
नीतिप्रिया वानरवल्लभेतदुल्लंगना(?)वृत्तमुदाजहार ॥

माधुर्यः प्रमदाजने सुललिते दाक्षिण्यमार्ये जने
शौर्यं शत्रुषु [६३]मार्दवं परिजने धर्मिष्ठता साधुषु ।
मर्मज्ञेष्व[६४]नुवर्तना [६५]बहुविधा मानं जने गर्विते
शाठ्यं पापजने नरस्य कथितं [६६]पर्याप्तमष्टौ [६७]गुणाः ॥ १
उत्साह[६८]संपन्नमदीर्घसूत्रिणं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥ २
सुजीर्णमन्नं सुविचक्षणः सुतः
[६९]सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य[७०] चोक्तं सुविचार्य यत्कृतं
तद्दीर्घकालेऽपि न याति [७१]विक्रियाम् ॥ ३
रूपं[७२] जरा सर्वसुखानि [७३]तृष्णा खलेषु सेवा [७४]पुरुषाभिमानम् ।
याच्ञा गुरुत्वं गुणमात्मशंसा[७५] चिन्ता बलं हन्ति दयां च लक्ष्मीः ॥ ४
श्रुतेन[७६] बुद्धिर्व्यसनेन मूर्खता प्रियेण नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता ॥ ५
शाठ्येन मित्रं कपटेन धर्मं परोपतापेन समृद्धिभावम् ।
सुखेन विद्यां परुषेण* नारीं वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥ ६
जवो हि सप्तेः परमं विभूषणं त्रपाऽङ्गनायाः कृशता तपस्विनाम् ।
द्विजस्य विद्यैव मुनेरपि क्षमा पराक्रमः शस्त्रबलोपजीविनाम् ॥ ७


---

५५ पुरुषम्. ५६ मित्रम्. ५७ पुरुषम्. ५८ विकारः. ५९ मूलम्. ६० वपुषो वयश्च. ६१ मूलम्. ६२ नीत्यष्टकम्. ६३ मृदुता. ६४ अनुवर्तनम्. ६५ बहुप्रकारम्. ६६ पूर्णत्वम्. ६७ चेद् भवति तदा. ६८ युक्तम्. ६९ सुशिक्षिता. ७० चिन्तयित्वा. ७१ विकारम्. ७२—७४ हन्ति. ७५ स्वगुणोदाहरणम्. ७६ अलङ्क्रियते.

* The Ms. reads पुरुषेण.

वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकं
योधं कापुरुषं विटं गतवयं स्वाध्यायहीनं द्विजम् ।
राज्यं बालनरेन्द्रमन्त्रिरहितं मित्रं छलान्वेषिणं
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः ॥ ८

॥ इति [77]वानर्यष्टकम्† ॥



१०. दैवाष्टकम् ।

वीची[1] कैवर्त[2] यद्भग्नं[3] तथा शशिदिवाकरम्[4] ।
अलं[5] सृजति[6] पौष्पाश्च[7] भग्नाशस्या[8]ष्टकं विधेः ॥

वीचीव्याप्तचयं निरुद्धवसुधं क्वागाररन्ध्रं पयो
गोलाङ्गूलविलोलपाणितुलिताः क्षुद्राः क्व ते क्ष्माभृतः ।
बद्ध्वा दाशरथिस्तथापि जलधिं प्रत्याजहार प्रियां
ग्रावाणोऽपि तरन्ति वारिणि यदा पुंसोऽनुकूलो विधिः ॥ १

[78]कैवर्तकर्कशकरग्रहणच्युतोऽपि
जाले पुनर्निपतितः शफरो वराकः ।
जालादपि प्रगलितो गलितो बकेन
वामे विधौ बत कुतो [79]व्यसनान्निवृत्तिः ॥ २

यद्भग्नं धनुरीश्वरस्य शिशुना[80] यज्जामदग्न्यो जित-
स्त्यक्ता यच्च गुरोर्गिरा वसुमती बद्धो यदम्भोनिधिः ।
एकैकं [81]दशकन्धरक्षयकृतो रामस्य किं वर्ण्यते
दैवं वर्णय येन सोऽपि सहसा नीतः कथाशेषताम्[82] ॥ ३

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च समीक्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥ ४

अलङ्कारः शङ्काकरनरकपालं परिकरो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको गतवयाः ।
अवस्थेयं स्थाणोरपि भवति यत्रामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥ ५

---

७७ नीत्यष्टकम्. ७८ धीवरस्य, जालिक[स्य]. ७९ कष्टात्. ८० सता. ८१ रामस्य
८२ कथात्वम्.

† The Ms. reads वानरर्यष्टकम्. Here र is superfluous.

सृजति तावदशेषगुणालयं पुरुषरत्नमलङ्करणं भुवः ।
तदनु तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥ ६
पौष्पाः पञ्चशराः शरासनमपि ज्याशून्यमिष्वासनं
जेतव्यं जगतां त्रयं स च पुनर्जेताऽप्यनङ्गः किल ।
इत्याश्चर्यपरम्पराघटनया चेतश्चमत्कारयन्
व्यापारः[८३] सुतरां विचारपदवीवन्ध्यो विधेर्वन्द्यताम् ॥ ७
भग्नाशस्य[८४] करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये व्याकुलम् ॥ ८

॥ इति दैवाष्टकम् ॥

---

११. अम्बुधराष्टकम् ।

सुखयसि[१] विलपति[२] यत्त्वं[३] तृषार्तमे[४] तानि[५] वितर[६] हे मेघ[७] ।
अयि जल[द][८] मामभ्युन्नतमि[९]दमम्बुधराष्टकं नाम ॥
सुखयसि तृषोत्रास्यत्तालुस्खलद्ध्वनिविह्वलं
कतिपयपयोबिन्दुस्यन्दैर्न चातकमागतम् ।
जलधर ! यदा कालात् कोऽपि प्रचण्डसमीरणः
प्रवहति तदा न त्वं नायं न ते जलबिन्दवः ॥ १
विलपति तृषा सारङ्गोऽयं [८५]भवांश्च समुन्नतो
जलमपि च ते संयोगोऽयं कथंचिदुपस्थितः ।
उपकृतिकृते [८६]प्रह्वं चेतः कुरुष्व यदग्रतो
भ्रमति [८७]पवनः क्व त्वं क्वायं क्व वा जलसंहतिः ॥ २
यत्त्वद्गर्जितमूर्जितं यदपि ते प्रोद्दामसौदामिनी
दानाडम्बरमम्बरे विरचितं यद्दूरमभ्युन्नतम् ।
तेषां पर्यवसानमेतदधुना जातं यदम्भोधरा
द्वित्राः कृत्रिमरोदनाश्रुतनवो मुक्ताः पयोबिन्दवः ॥ ३
तृषार्ते पाथोद ! प्रलपति पुरश्चातकशिशौ
यदेतन्नैष्ठुर्यं तदिह गदितुं मां त्वरयति ।

---

८३ यदा विचार्यते तदा तेन किमपि न भवति. ८४ भोगिनः. ८५ जलभृतः.
८६ प्रवणम्. ८७ पश्चात्.

वियद्वा स्वाधीना किमुत जलता वा परिणता
"मरुद्वा नो वास्यत्यथ घन! शरद्वा" न भविता ॥ ४

एतान्यहानि किल चातकशावकेन
नीतानि कण्ठकुहरस्थितजीवितेन ।
तस्यार्थिनो जलद! पूरय वाञ्छितानि
मा भूत् त्वदेकशरणस्य बत प्रमादः ॥ ५

वितर वारिद! वारि तृषातुरे
त्वरितमुद्यतचातकशावके ।
"मरुति विस्फुरति क्षणमन्यथा
क्व च भवान् क्व पयः क्व च चातकः ॥ ६

हे मेघ! मानमहितस्य तृषातुरस्य
त्यक्तत्वदन्यशरणस्य च चातकस्य ।
अम्भःकणान् कतिचिदप्यधुना निमुञ्च
नो चेद् भविष्यसि जलाञ्जलिदानयोग्यः ॥ ७

अयि जलद! यदि न दास्यसि कतिचित् त्वं चातकाय जलकणिकाः ।
"तदयमचिरेण भविता सलिलाञ्जलिदानयोग्यस्ते ॥ ८

मामभ्युन्नतमागतोऽयमिति वा कामं समासेवते
मच्छायामिति वा यदन्यविषयं "विद्वेष्टि वारीति वा ।
सद्यो वर्ष "वराकचातककृते नो चेदयं याचिता
याच्ञां यावदुपेक्षणं च जलद! व्रीडाकरं त्वादृशाम्" ॥ ९

॥ इति मेघाष्टकम् ॥

१२. समुद्राष्टकम् ।

एतस्मात् "किं ब्रूमो" लक्ष्म्या" दूराद्"यमि"तो" द्यामा" ।
आदा"पादैर्गदितं सुमुखि! समुद्राष्टकं नाम ॥

एतस्माज्जलधेर्जलस्य कणिकाः काश्चिद् गृहीत्वा ततः
पाथोदाः परिपूरयन्ति जगतीं "रुद्धाम्बरा वारिभिः ।

८८ हे मेघ. ८९ शरत्तु भविष्यति. ९० वायौ. ९१ चातकः. ९२ दूषयति. ९३ तदर्थे.
९४ नैताः स्वयमुपभोक्षसि मोक्षसि नूनं पयोद कुत्रापि ।
तत्र कथं न विमुञ्चसि मुक्ता मुक्ता भवन्ति यत्रापः ॥
९५ स्वतः.

भ्राम्यन्मन्दरकूटकोटिघटनाभित्तिभ्रमत्तारिकां
प्राप्यैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः[९६] ॥ १
किं ब्रूमो जलधिश्रियं स हि खलु श्रीजन्मभूमिः स्वयं
वाच्यं किं महिमाऽपि यस्य हि तव द्वीपं महीति श्रुतिः।
त्यागस्तस्य स कोऽपि बिभ्रति जगद् यस्यार्थिनो ह्यम्बुदाः
शक्तेर्यस्य कथैव का हि भवति क्षोभेण कल्पान्तरम् ॥ २
लक्ष्म्यास्त्वं निलयो निधिश्च पयसां निःशेषरत्नाकरो
मर्यादानिरतस्त्वमेव जलधे! [९७]ब्रूतेऽत्र कोऽन्यादृशम्।
किन्त्वेकस्य गृहागतस्य वडवावह्नेः सदा तृष्णया
क्रान्तस्योदरपूरणेऽपि न सहो यत्तून्मनाग्[९८] मध्यमः ॥ ३
दूरान्मार्गग्लपितवपुषो मारुतोत्तम्भिताम्भः-
कल्लोलालीबहलवितृषो[९९] धाविताः पान्थसार्थाः।
व्यावर्तन्ते तटमुपगता [१००]यस्य विच्छिन्नवाञ्छा-
[१०१]स्तस्याम्भोधेर्विफलपयसः[१०२] कार्यतः किं न [१०३]शुष्कम् ॥ ४
अयं वारामेको [१०४]निलय इति संचिन्त्य सहसा
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति[१०५] मुनिः ॥ ५
इतो वसति केशवः पुरमितस्तदीयद्विषा-
मितोऽपि शरणागताः शिखरिपक्षिणः शेरते।
इतोऽपि वडवानलः सह समस्तसंवर्तकैः[१०६]
सदा विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ६
द्यामारोहति वाञ्छति स्थगयितुं तेजांसि तेजस्विना-
मुच्चैर्गर्जति पूरयत्यपि महीमम्भोभिरम्भोधरः।
कांश्चिद् द्रागुपजीव्य[१०७] तोयचुलकान् सिन्धो! भवत्संनिधौ
पानीयप्रचयेषु सत्स्वपि न ते जातो विकारः क्वचित् ॥ ७
आदाय वारि परितः सरितां शतेभ्यः किं नाम साधितमनेन महार्णवेन।
क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च ॥ ८

॥ इति समुद्राष्टकम् ॥

---

९६ मर्यादावर्णनम्. ९७ ब्रूमः कमेतादृशम्. ९८ ईषत्. ९९ तद्वाञ्छितः. १०० जलधेः. १०१ अतः. १०२ तस्य. १०३ जलम्. १०४ विचार्य. १०५ पानं करिष्यति. १०६ जीवादिभिः १०७ गृहीत्वा.

१३. सत्पुरुषाष्टकम् ।

शीतांशु[१]स्ते केचिन्न[२]म्रत्वे[३] ये[४] करे[५] विपदि[६] वाञ्छा[७] ।
गर्व[८]मिति चन्द्रवदने सत्पुरुषाष्टकमिदं गदितम् ॥

शीतांशुः किं सुधायामभवदुत सुधैवाभवच्छीतरश्मे-
राहोस्विद् द्वावपीमौ मृगदृशि घटितावैतयोर्वा मृगाक्षी ।
एकैकं सज्जनाद् वा समजनि जनितः सज्जनो वा किमेभिः
सन्देहश्चायमित्थं कथमपि मनसो जीवतां न प्रयातः ॥ १

ते केचिन्निजकान्तिसुन्दरतया चेतश्चमत्कारिणो
दृश्यन्ते परमोत्सवं नयनयोः संपादयन्तो जनाः ।
अन्तर्ये मनसः प्रविश्य सहसा तैस्तैः स्वकीयैर्गुणै-
राजन्मावधि नोत्तरन्ति हृदयादुत्कीर्णबिम्बा इव ॥ २

नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः
पुष्णन्तः स्वीयमर्थं सततकृतमहारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् दुःखयन्तः
सन्तः स्वाश्चर्यचर्याः स्वयमिह मुनयो वन्दनीया भवन्ति ॥ ३

ये प्राप्ते व्यसनेऽप्यनाकुलधियः सम्पत्सु नैवोन्नताः
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणोपभोगैरपि ।
ह्रीमन्तः स्वगुणप्रपञ्चनविधावन्यश्रुतावुत्सुका
धिग् धात्रा कृपणेन तेऽपि न कृताः कल्पान्तदीर्घायुषः ॥ ४

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोः पौरुषमलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमवितथं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ५

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
प्रिया न्याय्या* वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाभ्यर्थ्याः सुहृदपि[१०]† न वाच्यः कृशधनः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६

---

* The Ms. reads नाय्या.

† The Ms. reads सुहृदि न । The verse is metrically defective. One more syllable is required. So the reading from Bhartr. I. 14; Sbhr, 280 has been adopted here.

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम्।
भक्तिश्चार्हति[१०८] शक्तिरात्मदमने संसर्गमुक्तिः खले
एते येषु वसन्ति निर्मलगुणाः श्लाघ्यास्त एव क्षितौ॥ ७
गर्वं नोद्वहते न निन्दति परं नो निष्ठुरं भाषते
प्रोक्तः केनचिदप्रियाणि सहते क्रोधं च नालम्बते।
श्रुत्वा काव्यमलक्षणं परकृतं संतिष्ठते मूकवद्
दोषांश्छादयति स्वयं न कुरुते चैतत् सतां लक्षणम्॥ ८

॥ इति सत्पुरुषाष्टकम्॥

१४. गजाष्टकम्।

चिन्ताम्[१] अन्तः[२] कौपं[३] रेवा[४] दन्ते[५] तथैव नो मन्ये[६]।
न चरसि[७] घासग्रासं[८] गजाष्टकं विश्रुतं लोके॥

चिन्तामिमां वहसि किं गजयूथनाथ!
योगीव योगमनुमीलितनेत्रयुग्मम्।
पिण्डं गृहाण पिब वारि यथोपनीतं
दैवाद् भवन्ति विपदः खलु संपदो वा॥ १
[१०९]अन्तःसमुत्थविरहानलतीव्रताप-
सन्तापिताङ्गकरिपुङ्गव! मुञ्च शोकम्।
धात्रा स्वहस्तलिखितानि ललाटपट्टे
को वाऽक्षराणि परिमार्जयितुं समर्थः॥ २
कौपं वारि विलोक्य वारणपते! किं विस्मितेनास्यते[११०]
प्रायो भाजनमस्य[१११] संप्रति भवांस्तत् पीयतामादरात्।
उन्मज्जच्छफरीपुलिन्दललनापीनस्तनास्फालन-
स्फारीभूतमहोर्मिनिर्मलजला दूरेऽधुना नर्मदा॥ ३
रेवापयः किशलयानि च सल्लकीनां
वन्ध्योपकण्ठविपिनं स्वकुलं च हित्वा।
किं [११२]ताम्यसि द्विप! गतोऽसि वशं करिण्याः
स्नेहो हि कारणमनर्थपरम्परायाः॥ ४

---

१०८ देवार्चने. १०९ वियोगवशगत. ११० स्थीयते. १११ कूपस्य. ११२ खेदं करोषि.

दन्तन्यस्तकरप्रलम्बितशिराः संमील्य नेत्रद्वयं
किं त्वं वारण! खिद्यसे वनितया को नाम नो वञ्चितः।
भूत्वा शान्तमना गृहाण कवलं स्नेहोऽधुना त्यज्यतां
ये मत्तास्त्वविवेकिनो विषयिणस्ते प्राप्नुवन्त्यापदम्॥ ५
नो मन्ये दृढबन्धनं कृतमिदं नैवाङ्कुशोद्घातनं
स्कन्धारोहणताडनात् परिभवा नैवान्यदेशागमः।
चिन्तां मे जनयन्ति चेतसि यथा स्मृत्वा स्वयूथं वने
सिंहत्रासितभीतभीरुकलभा यास्यन्ति कस्याश्रये॥ ६
न चरसि(ति?) गजराजः पल्लवान् सल्लकीनां
न पिबसि(ति?) गिरिकुण्डे नैर्झरं वारि हारि।
विततदशनकोटौ दत्तहस्तावलम्बो
वहति विरहखिन्नप्राणभारं करीन्द्रः॥ ७
घासग्रासं गृहाण त्यज करिकलभ! प्रीतिबन्धं करिण्यां
पाशग्रन्थिव्रणानामविरतमधुना देहि पङ्कानुलेपम्।
दूरीभूतास्तवैते शबरकुलवधूविभ्रमोद्भ्रान्तिदृष्टा
रेवातीरोपकण्ठच्युतकुसुमरजोधूसरा विन्ध्यपादाः॥ ८

॥ इति गजाष्टकम्॥

१५. वृक्षाष्टकम्।

किं जातो(१)ऽस्यथ जातो(२)सि(?)* शुक्लं(३) मूलं(४) तथैव किं तेन(५)।
न्यग्रोध(६)पान्थ(७)हंहो(८) भ्राम्यद्(९) वृक्षाष्टकं शृणु[त]†॥

किं जातोऽसि चतुष्पथे घनतरं छन्नोऽसि किं छायया
छन्नश्चेत् फलितोऽसि किं यदि फलैः पूर्णोऽसि किं [११३]संनतः।
हे सद्वृक्ष! सहस्व सम्प्रति चिरं शाखाशिखाकर्षण-
क्षोभामोटनभञ्जनानि [११४]जनतः [११५]स्वैरेव दुश्चेष्टितैः॥ १

११३ नम्रतां गतः. ११४ उत्पादयतो जनस्य. ११५ स्वकीयैः.

* This सि appears to be redundant from the point of view of metre. At beginnig of the second stanza also stands जातो and not जातोसि.

† Compare the end of the Pratīka stanza in the beginning of the Seventh Aṣṭaka.

जातो मार्गे सुरभिकुसुमः सत्फलो नम्रशाखः
स्फीताभोगो बहलविटपः स्वादुतोयोपगूढः[११६] ।
नैवात्मार्थं वहति महतीं पादपेन्द्रः श्रियं ता-
[११७]मापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ २

भुक्तं स्वादुफलं कृतं च शयनं शाखाग्रजैः पल्लवैः
स्वच्छायापरिशीतलं च सलिलं पीतं व्यपेतक्लमैः ।
विश्रान्ताः सुचिरं परा च मनसः प्रीतिः किमत्रोच्यते
त्वं सन्मार्गतरुर्वयं च पथिका यामः पुनर्दर्शनम् ॥ ३

मूलं योगिभिरुद्धृतं निवसितं वासोर्थिभिर्वल्कलं
भूषार्थी च जनश्चिनोति कुसुमं भुङ्क्ते क्षुधार्तः फलम् ।
छायामातपिनो विशन्ति विचिता निद्रालुभिः पल्लवाः
कल्पाख्यस्य तरोरिवेह भवतः सर्वाः परार्थाः श्रियः ॥ ४

किं ते नम्रतया किमुन्नततया किं वा घनच्छायया
किं वा पल्लवलीलया किमनया चाशोक ! पुष्पश्रिया ।
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः[११८] स्तुवन्नन्वहं
न स्वादूनि मृदूनि खादति फलान्याकण्ठमुत्कण्ठितः ॥ ५

न्यग्रोधे[११९] फलशालिनि स्फुटरसं किंचित्फलं पच्यते
बीजान्यङ्कुरगोचराणि कतिचित् सिध्यन्ति तस्मिन्नपि ।
एकस्तेष्वपि कश्चिदङ्कुरवरो बध्नाति तामुन्नतिं
यामध्यास्य जनः स्वमातरमिव क्लान्तिच्छिदे धावति ॥ ६

पान्थाधार इति द्विजाश्रय इति श्लाघ्यस्तरूणामिति
स्निग्धच्छाय इति दृशोः प्रिय इति स्थानं गुणानामिति ।
यावत् तत्क्षणमाश्रयन्ति गुणिनः क्लान्तिच्छिदे पादपं
तावत् कोटरनिर्गतैरहिगणैर्दूरं समुत्सारिताः ॥ ७

हंहो पान्थ ! किमाकुलः श्रमवशादत्युद्धतो धावसि
प्रायेणास्य महाद्रुमस्य भवता वार्तापि नाकर्णिता ।
मूलं सिंहसमाकुलं तु शिखरे प्रोच्चण्डतुण्डाः खगा
मध्ये कोटरभाजिभीषणफणाः फूत्कुर्वते पन्नगाः ॥ ८

भ्राम्यद्भृङ्गभरावनम्रकुसुमस्तोमो[१२०]द्भवद्गन्धिषु
च्छायावत्सु तलेषु पान्थनिचया विश्रम्य गेहेष्विव ।
निर्यन्निर्झरवारिवारिततृषस्तृप्यन्ति येषां फलै-
स्ते नन्दन्तु फलन्तु यान्तु च परामभ्युन्नतिं पादपाः ॥ ९

॥ इति वृक्षाष्टकम् ॥

---

११६ व्याप्तः. ११७ कस्यचित्. ११८ समूहः. ११९ वट. १२० उद्गच्छत्.

१६. सारङ्गाष्टकम् ।

बीजै[1]रन्ये[2] हा धिक्[3] योऽयं[4] किं नाम[5] विरम[6] चान्ये ते[7] ।
आद्यपदैरिति गदितं सारङ्गाष्टकमिदं लोके ॥

बीजैरङ्कुरितं लताभिरुदितं वल्लीभिरुज्जृम्भितं
कन्दैः कन्दलितं जनैः प्रमुदितं धाराधरे वर्षति ।
भ्रातश्चातक ! पातकं किमपि ते सम्यग् न जानीमहे
येनास्मिन्न पतन्ति चञ्चुपुटके छिन्नाः पयोबिन्दवः ॥ १

अन्येऽपि सन्ति नवतामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः[121] ।
कोऽपि ग्रहो गुरुरयं हतचातकस्य
पौरन्दरीं यदभिवाञ्छति वारिधाराम् ॥ २

हा धिक्कथं व्यसनदुर्ललितस्मयेन
केनापि रे सरलचातक ! वञ्चितोऽसि ।
येनाम्बुवाहमपि याचसि याचितस्य
यस्यास्य याचितुरिवातिमलीमसत्वम्[122] ॥ ३

योऽयं वारिधरो धराधरशिरस्यभ्युन्नतः केवलं
गर्जत्येव गभीरधीरनिनदैर्नायं सखे ! वारिदः ।
तत्ते चातक ! पातकस्य कतमस्यैतत्फलं पच्यते
येनासौ न ददाति याति च न ते चेतोऽपि निर्वाणताम्[123] ॥ ४

किं नाम दुष्कृतमिदं भवतश्चकास्ति
येनात्र दैन्यपिशुनं बत याचितोऽपि ।
एते हि कामनिभृतोन्नतयोऽपि तृप्त्यै
मुञ्चन्ति चातक ! पयो न पयोमुचस्ते ॥ ५

विरम[124] चातक ! दैन्यमपास्यतां बत चटूनि[125] कियन्ति करिष्यसि ।
विधिविनिर्मितमम्बुकणद्वयं किमधिकं कलयापि भविष्यति ॥ ६

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये
भ्रातश्चातक ! किं वृथात्र रटितैः खिन्नोऽसि विश्रम्यताम् ।
मेघः शारद एष काशधवलः पानीयरिक्तोदरो
गर्जत्येव हि केवलं भृशमपां नो बिन्दुमप्युज्झति ॥ ७

॥ बप्पीहाष्टकम् ॥

॥ श्री ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ श्री ॥

---

१२१ जलाश्रयाः. १२२ उत्पन्नम्. उत्पद्यते १२३ निर्वृतिम्. १२४ विरलो भव.
१२५ प्रियवचनानि.

परिशिष्टम् ।

१७ रत्नाष्टकम् ।*

पथि परिहृत[1] कनक[2] मनस्तमित[3] विरम रत्न[4] केन[5] सन्त्यन्ये[6]
एकस्मिन्[7] वणिगधिपते[8] पादै रत्नाष्टकं गदितम् ॥

पथि परिहृतं कैश्चिद् दृष्ट्वा न जातु परीक्षितं
विधृतमपरैः काचं मत्वा पुनः परिवर्जितम् ।
गवलगणनामन्यैः कृत्वा प्रघृष्टमपण्डितै-
र्मरकतमहो मार्गावस्थं कथं न विडम्बितम् ॥ १

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते ।
न च विरौति न चापि स शोचते भवतु योजयितु[1]र्वचनीयता ॥ २

अनस्तमितसारस्य तेजसस्तद्विजृम्भितम् ।
येन पाषाणखण्डस्य मूल्यमल्पं वसुन्धरा ॥ ३

विरम रत्न मुधा तरलायसे[2] तव न कश्चिदिहास्ति परीक्षकः ।
विधिवशेन परिच्युतमाकरात् त्वमपि काचमणिः कृतमीश्वरैः ॥ ४

केनानीतः सुखमकरुणेनाकरा[3]दुद्धृतस्त्वं
विक्रेतुं वा समभिलषितः केन देशान्तरेऽस्मिन् ।
यस्मिन् वित्तव्ययभरसहो ग्राहक[4]स्तावदास्ताम्
नास्ति भ्रातर्मरकतमणे! त्वत्परीक्षाक्षमोऽपि ॥ ५

सन्त्य[5]न्ये झषकेतनस्य मणयः किं वोल्लसत्कान्तयः
किं वा तेऽपि जनेन भूषणपदं न्यस्ता न शोभाभृतः ।
अन्यः कोऽपि तथापि कौस्तुभमणिः स्फीतः स्फुरद्दीधिति-
र्यः पूषेव नभः समुज्ज्वलयति स्फारं मुरारेरुरः ॥ ६

एकस्मिन् दिवसे [म] या विचरता प्राप्तः कथंचिन्मणिः
मूल्यं यस्य न विद्यते भवति चेत् पृथ्वी समस्ता ततः ।
सोऽयं दै[6]ववशाद[भूद]तितरां काचोपमः साम्प्रतं
किं कुर्मः कमुपासहे क्व स सुहृद् यस्यायमावेद्यते ॥ ७

---

* This is an extra Aṣṭaka found in B. The corrections of some wordss in this Aṣṭaka are based on AM.

1 The Ms. reads योजयतु व°. As such it is metrically defective.
2 The Ms. reads तरलायसि.
3 The Ms. reads °नादरा°.
4 The Ms. reads ग्रासक°.
5 The Ms. reads न्येऽपि निके°.
6 The Ms. reads °देव°.

* अन्योक्त्य०

वणिगधिपते! किंचिद् ब्रूमः क्रुधामिह मा कृथाः
कथय निभृतं केयं नीतिः पुरे तव सम्प्रति ।
मरकतमणिः काचो वायं भवेदिति संशये[7]
लवणवणिजां यद् व्यापारं परीक्षितुमीक्ष्यते ॥

॥ इति रत्नाष्टकम् ॥

The verses missing in A and found in B.

II Aṣṭaka: st. 9 cd.

इति विहगसमूहान्नित्यमापृच्छ्यमानो रजनिविरहभीतश्चक्रवाको वराकः॥

III Aṣṭaka: *Pratīka* st. a.

येन कृत्वापि मातङ्गो अन्यासु निराचष्टे च दुराच* ।

VIII Aṣṭaka: st. 8.

क्रतौ विवाहे व्यसने रिपुक्षये प्रियासु नारीषु ध(ज?) नेषु बन्धुषु ।
यशस्करे कर्मणि मन्त्रसंग्रहेष्वतिव्ययो नास्ति नराधिपाष्टसु ॥

Extra stanzas found in B.

VII Aṣṭaka: after st. 7:

१. हस्तास्फालनलालनैर्बहुविधैः पूत्कारठात्कारितै-
र्द्वित्राण्येव पदानि यान्ति गलयो मार्गे समं संहताः ।
तीर्थोत्तारणसङ्कटे ऽतिकिणितिग्रीवः पुनः पुङ्गवः
लीलोन्नाटितकन्धरो न धनिनः क्लेशाय संपद्यते ॥

२. पङ्कादपि धुरं धुर्यो लीलया कर्षति क्षणात् ।
आहतश्चकितो वापि गलिर्गुरुशिलायते ॥

XI Aṣṭaka: at the beginning:

१. एतेषु रे तरुणमारुतधूयमानदावानलैः कवलितेषु महीरुहेषु ।
अम्भो न चेज्जलद! मुञ्चसि मा विमुञ्च वज्रं पुनः क्षिपसि निर्दय! कस्य हेतोः॥

at the end:

१. शोषं गते सरसि शैवलमञ्जरीणामन्तस्तिमिर्लुठति तापविसंस्थुलाङ्गः ।
अत्रान्तरे यदि न वारिद! वारिपूरैरापूरयेत् तदनु किं मृतमण्डनेन ॥

२. एकस्त्वदेकशरणो न जहाति दैन्यमन्यस्तु वारिकणिकामपि न प्रदत्ते ।
बुध्यामहे न कृतवस्तुविचारसाराः सारङ्गवारिधरयोः कतमोऽत्र निन्द्यः ॥

---

7 The Ms. reads संशयं

* This verse is metrically defective.

Important Variants from B.

I Aṣṭaka:

st. 2a. सममम्बु
2b. °मुभये निमज्जतः
st. 3b. °प्रबन्धाः
st. 6a. °वीचीमन्द°
6b. त्वन्मुखे. मयात्तम्

II Aṣṭaka:

st. 1d. गहनं न हि
st. 2b. सरः सारसम्
st. 8b. तीरात्तीरतटात्*

III Aṣṭaka:

Pratīka st. b °ष्टकं कथ्यमेतमाख्यातम्
st. 1b. मृगाङ्कधवला
st. 8c. प्रियङ्गौ ना

IV Aṣṭaka:

st. 1d. याः प्ररूढाः
st. 2d. जरठभुरुह°
st. 3d. °कलापीकुलाः
st. 5c. वच्मि भवन्तमुच्चैः
5d. का सङ्गतिः
st. 6b. संतर्पयेत्तद्वपुः
6d. शीलिपल्लवाः
st. 7a. दुर्लङ्घ्यताम्
st. 8a. सस्यान्यरण्ये
8b. °समृध्या पीलुवत्सु

V Aṣṭaka:

st. 1b. पाशैर्मही
1d. देशमाश्रयति
st. 3a. °दसकृन्नष्टां नष्टां
st. 4c. पश्य विवशो
st. 5a. कूटमपरं
st. 6d. विलोकित°
st. 7c. °विधुरान्मुक्त्वा. मृगान्
st. 8a. मलयस्य

VI Aṣṭaka:

Pratīka st. c. सामनयस्य
st. 8c. विचरत
st. 9d. तेजस्तु तत्स्फुरति यस्य जगद्वराकम्
st. 10c. °संचूर्णन°

VII Aṣṭaka:

Pratīka st. a. गुरुर्यथा च यस्यादौ.
st. 2a. °पृष्ठे
st. 4b. विक्ष्यसे
st. 6a. ग्रावगहनो
6b. गात्राणि. सारथिरथम्
6d. हहा दूरी°

VIII Aṣṭaka:

st. 5a. शुष्केन्धनैर्वह्नि°

IX Aṣṭaka:

Pratīka st. °वल्लमेन उल्लिङ्गना
st. 1c. घर्मङ्गेष्व°

X Aṣṭaka:

st. 1a. °व्याप्तवियन्नि°. कागाघरन्ध्रं°
st. 2c. जालाच्च्युतो विगलितो गलितो
st. 3b. त्यक्ता येन
st. 4c. निरीक्ष्य
st. 6a. °गुणाकरं
st. 7a. °शून्यमक्षो (मिषो)र्लता
st. 8d. चाकुलम्

XI Aṣṭaka:

st. 1d. प्रभवति
st. 4c. जडता

XII Aṣṭaka:

st. 2a. जलधेः
2b. वाच्यः. नवद्वीप°
2d. शक्तेः कैव कथा हि यस्य भवति
st. 3d. यत्तन्मनान्मध्यमं [:]
st. 4b. °बहलिततृषो
st. 5b. इति रत्नाकर इति
st. 6d. अहो वितत°

XIII Aṣṭaka:

st. 1b. °र्वाहोश्चिद्
st. 2c. अन्तर्येन मनसः प्रविश्य विशदेस्तैस्तै
st. 3c. दुर्मुखान् दुःखयन्तः

---

* The reading is metrically defective.

st. 3d. साश्चर्यवर्याः
st. 4c. °न्यस्तुताशु°
st. 5a. °पादप्रणमनम्
st. 6c. न याच्यस्तनुधनः
st. 7cd. खलादेते यत्र
st. 8d. सतां चेष्टितम्

XIV Aśṭaka:

st- 1b. योगी वियोगविनिमीलित°
st. 3b. भाजनमस्ति
st. 4b. °कण्ठगहनं
st. 5a. दन्ते न्यस्तकरः
st. 6b. परिभवो
st. 7a. न चरति वनराज्यां
7b. पिबति
7c. विततरदन°
7d. विरहखिन्नः शोकभारं
st. 8a. करिण्याः
8c. शबरवर°
8d. कण्ठद्रुम°

XV Aṣṭaka:

Pratīka st. a जातो मा. तथैव च किं ते
b. पान्थाश्च हंहो वृक्षा°
st. 1d. °क्षोभामञ्जनमोहनानि
st. 9a. कुसुमश्च्योतन्मधूद्गन्धिषु

XVI Aṣṭaka:

Pratīka st. b. हंहो चातकशब्दैर्बष्पीहस्याष्टकं नाम
st. 3a. धिक् परव्यसनदुर्ललितः सयेन (? दुर्ललिताशयेन)
st. 4d. निर्विघ्नताम्

Some Important Corrections

पृ.	पं.	अशुद्धम्	शुद्धम्
३	३	बिलसता°	बिसलता°
४	२	°ख्यानम्	°ख्यातम्
७	२४	मदे	मुदे
९	२	वयस्यादौ	च यस्यादौ
११	८	°भेतदु°	°भैतदु°
२३	२४	जल[द]	जल
२३	२५	°दम्भोधरा	°दम्भोधर

अन्योक्ति संग्रहागत पद्यानुक्रमसूची ।

(अकारादि क्रमनिबद्ध)

	श्लोक	पृष्ठ
अ		
अद्यापि न स्फुरति	६,५	८
अनसि सीदति सैकत०	७,३	९
अन्तः ससुत्थविरह०	१४,२	१७
अन्यासु तावदुपमर्दसहासु	३,४	४
अन्यास्ता मलयाद्रि०	५,८	७
अन्ये ते जलदायिनो	१६,७	१९
अन्येऽपि सन्ति	१६,२	१९
अपसरणमेव युक्तं	१,७	२
अयं वारामेको निलय	१२,५	१५
अयि जलद यदि	११,८	१४
अर्थस्य मूलं निकृतिः	८,७	११
अलङ्कारः शङ्काकरनर०	१०,५	१२
असकृदसकृन्नष्टाङ्गोऽयं	५,३	६
अस्तं गतोऽयं	२,१	२
आ		
आदाय वारि परितः	१२,८	१५
आयाते दयिते	४,७	६
इ		
इतो वसति केशव	१२,६	१५
उ		
उत्कूजति श्वसति	२,८	३
उत्साहसम्पन्नमदीर्घ०	९,२	११
ऊ		
ऊढा येन महाधुरा	७,८	१०
ए		
एकेनार्के प्रकटितरुषा	२,७	३
एतस्माज्जलधेर्जलस्य	१२,१	१४
एतान्यहानि किल	११,५	१४
क		
कथय किमपि दृष्टं	२,९	३
करे श्लाघ्यस्त्यागः	१३,५	१६
कवलितमिह नालं	२,४	२
किं जातोऽसि चतुष्पथे	१५,१	१८
किं ते नम्रतया	१५,५	१९
किं नाम दुष्कृतमिदं	१६,५	१९
किं ब्रूमो जलधिश्रियं	१२,२	१५
कृत्वापि कोशपानं	३,२	४
कैवर्तकर्कशकरग्रहणच्युतो	१०,२	१२
कौपं वारि विलोक्य	१४,३	१७
क्षुत्क्षामोऽपि जराकृशोऽपि	६,१	७
ग		
गतं तद्गाम्भीर्यं तटमुपचितं	१,५	१
गर्वं नोद्वहते न	१३,८	१७
गाङ्गमङ्ग सितमम्बु यामुनं	१,२	१
गुरुर्नायं भारः क्वचिदपि	७,५	९
घ		
घासग्रासं गृहाण त्यज	१४,८	१८
च		
चर करभ यथेच्छं	४,८	६
चिन्तां मुञ्च गृहाण	४,३	५
चिन्तामिमां वहसि	१४,१	१७
छ		
छित्वा पाशमपास्य	५,५	७
ज		
जवो हि सप्तेः परमं	९,७	११
जातो मार्गे सुरभिकुसुम०	१५,२	१९
त		
तटमनुतटं पद्मे पद्मे	१,४	१
तृषार्तें पाथोद	११,४	१३
ते केचिन्निजकान्ति०	१३,२	१६
त्यजति भयं कृतपापं	८,६	११
त्यक्तं जन्मवनं	५,७	७

	श्लोक	पृष्ठ
द		
दक्षः श्रियमधिगच्छति	८,१	१०
दन्तन्यस्तकरप्रलम्बितसिराः	१४,५	१८
दानं दरिद्रस्य विभोः	८,२	१०
दिनान्ते चक्रवाकेन	२,६	३
दुर्मन्त्रिणं कमुपयान्ति	८,४	१०
दुःप्रापमम्बु पवनः	४,५	५
दूरादुज्झति चम्पकं	३,६	४
दूरान्मार्गग्लिपितवपुषो	१२,४	१५
धामारोहति वाञ्छति	१२,७	१५
द्रुततरमितो गच्छ	५,६	७
न		
न खनति खुरैः क्षोणीपृष्ठं	७,२	९
न चरसि गजराजः	१४,७	१८
न ध्वानं कुरुषे न यासि	७,४	९
न भवति मिथुनानां	४,२	५
नम्रत्वेनोन्नमन्तः	१३,३	१६
निद्राघूर्णितलोचनो मृगपति	६,६	८
निराचष्टे यष्टि	३,५	४
निरानन्दः कौन्दे मधुनि	३,८	५
नो मन्ये दृढबन्धनं	१४,६	१८
न्यग्रोधे फलशालिनि	१५,६	१९
प		
पान्थाधार इति द्विजाश्रय	१५,७	१९
पौष्पाः पञ्चशराः	१०,७	१३
प्रकृतिरयं सत्त्ववतां	६,७	८
प्रतिवेशी हंसजनः	३,७	४
प्रियायां स्वैरायां	५,४	७
ब		
बीजैरङ्कुरितं लताभिरु०	१६,१	१९
भ		
भग्नाशस्य करण्डपिण्डित०	१०,८	१०
भुक्तं स्वादु फलं	१५,३	१९
भ्राम्यद्भृङ्गभरावनम्रकुसुम०	१५,९	१९
म		
मत्तेभकुम्भनिर्भेदकठोर०	६,३	८
मातङ्गेन मदावलिप्तमनसा	३,३	४
माधुर्यः प्रमदाजने सुललिते	९,१	११
मामभ्युन्नतमागतो	११,९	१४
मार्गे कर्दमदुस्तरे	७,१	९
मित्रे क्वापि गते	२,२	२
मूलं योगिभिरुद्धृतं	१५,४	१९
मृगारिं वा मृगेन्द्रं वा	६,४	८
मृगैर्नष्टं शशैर्लीनं	६,२	८
य		
यत्त्वद्गर्जितमूर्जितं	११,३	१३
यथा भग्नः पन्था	७,६	९
यथेष्टं चेष्टध्वं	६,८	८
यद्भग्नं धनुरीश्वरस्य	१०,३	१२
यस्यादौ व्रजमण्डनस्य	७,७	१०
यः सन्तापमपाकरोति	१,१	१
येनामोदिनि केसरस्य	३,१	४
ये प्राप्ते व्यसनेऽप्य०	१३,४	१६
योऽयं वारिधरो	१६,४	१९
र		
रज्वा दिशः प्रवितताः	५,१	६
रूक्षं वपुर्न च विलोचन	४,४	५
रूपं जरा सर्वसुखानि	९,४	११
रेवापयः किशलयानि	१४,४	१७
ल		
लक्ष्म्यास्त्वं निलय	१२,३	१४
व		
वक्रग्रीवमुदीक्षसे किमपरं	४,६	६
वाञ्छा सज्जनसङ्गमे	१३,७	१७
वापीतोयं तटतरुवनं	२,३	२
वितर वारिद वारि	११,६	१४
विपद्युच्चैः स्थेयं पदम्	१३,६	१५
विरम चातक दैन्यं	१६,६	१९
विलपति तृषा सारङ्गो	११,२	१३
विस्रं वपुः परवधप्रवणं	६,९	८
वीचीव्याप्तचयं निरुद्धवसुधं	१०,१	१२
वैद्यं पानरतं नटं	९,८	१२

	श्लोक	पृष्ठ
श		
शतगुणपरिपाट्या पर्यटन्	२,५	३
शशिदिवाकरयोर्ग्रहपीडनं	१०,४	१२
शाठ्येन मित्रं कपटेन	९,६	११
शीतांशुः किं सुधायाम्	१३,१	१६
शुष्केन्धने वह्निरुपैति	८,५	१०
श्रुतेन बुद्धिर्व्यसनेन	९,५	११
स		
सन्त्यन्यत्रापि वीचीचय०	१,३	१
सरलितगलनालीं कन्धरां	४,१	५
सामोपायनप्रपञ्चपटवः	६,१०	८
सुखयसि तृषोत्रास्यत्तालु	११,१	१३
सुजीर्णमन्नं सुविचक्षणः	९,३	११
सृजति तावदशेषगुणालयं	१०,६	१३
स्तब्धस्य नश्यति यशो	८,३	१०
स्थलीनां दग्धानामुपरि	५,२	६
स्थित्वा चिरं नभसि	१,८	२
स्मरसि सरसि	१,६	२
ह		
हंहो पान्थ किमाकुलः	१५,८	१९
हा धिक्कथं व्यसन०	१६,३	१९
हे मेघ मानमहितस्य	११,७	१४